हरिर्यस्तस्मिन्स्त्रीगणपरिवृतो नृत्यति सदा
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥६॥
स्फुरद्गुंजापुंजाकलितनिजपदाब्जविलुठत्
स्रजि श्यामाकामास्पदपदयुगे मेचकरुचि ।
वरांगे श्रृंगारं दधति शिखिनां पिच्छपटलै
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥७॥
दुरंतं दुःखाब्धिं हसितसुधया शोषयति यो
यदास्येंदुर्गोपीनयननलिनानंदकरणम् ।
अनंगः सांगत्वं व्रजति मम तस्मिन् मुररिपौ
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥८॥
इदं यः स्तोत्रं श्रीपरिवृढसमीपे पठति वा ।
श्रृणोति श्रद्धावान् रतिपतिपितुः पादयुगले ॥
रतिं प्रेप्सुः शश्वत्कुवलयदलश्यामलतनौ ।
रतिः प्रादुर्भूता भवति नचिरात्तस्य सुदृढा ॥९॥

इति श्रीवल्लभाचार्यविरचितं श्रीपरिवृढाष्टकं समाप्तम् ।

# अथ श्रीमधुराष्टकम् ।

श्रीकृष्णाय नमः ।

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलंमधुरम् ।१।

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥२॥

वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥३॥

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥४॥

करणं मधुरं तरणं मधुरं हरणं मधुरं स्मरणं मधुरं ।
वमितं मधुरं शमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥५॥

गुंजा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥६॥

गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
इष्टं मधुरं शिष्टं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥७॥

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥

इति श्रीवल्लभाचार्यविरचितं मधुराष्टकं समाप्तम् ।